SAṀSKṚTA-SAṄGĪTA-VAIJAYANTĪ

Studies in Sanskrit and Musicology

SMT. KAMLESH KUMARI KULSHRESHTHA
COMMEMORATION VOLUME

Edited by

DR. SUSHMA KULSHRESHTHA
D. Phil.; D. Litt.; F.R.A.S. (London)
Deptt. of Sanskrit, Daulat Ram College
University of Delhi.

And

DR. SATYA PAL NARANG
M. A.; Ph. D.; LL.B.
Ex. Prof. & Head, Deptt. of Sanskrit
Pondicherry University,
Reader in Sanskrit, University of Delhi.

Eastern Book Linkers
DELHI :: (INDIA)

Published by :
EASTERN BOOK LINKERS
5825, New Chandrawal, Jawahar Nagar,
Delhi-110007
Phone. 2520287

ISBN : 81-85133-56-5

© Editors

First Edition : 1992

Price : 1200.00

Printed by :
Amar Printing Press (Sham Printing Agency)
8/25, Double Storey, Vijaya Nagar, Delhi-9

संस्कृत-संगीत-वैजयन्ती
(Studies in Sanskrit and Musicology)

श्रीमती कमलेश कुमारी कुलश्रेष्ठ
स्मृत्यभिनन्दन ग्रन्थ

सम्पादन :

डॉ० सुषमा कुलश्रेष्ठ
डी. फ़िल; डी. लिट्; एफ़. ग्रार. ए एस. (लन्दन)
संस्कृत विभाग, दौलतराम कॉलेज
दिल्ली विश्वविद्यालय, दिल्ली

एवं

डॉ० सत्यपाल नारङ्ग
एम. ए.; पीएच. डी.; एल. एल. बी.
पूर्व प्रोफेसर एवम् अध्यक्ष, संस्कृत विभाग
पाण्डिचेरी विश्वविद्यालय,
रीडर, संस्कृत विभाग, दिल्ली विश्वविद्यालय

ईस्टर्न बुक लिंकर्स
दिल्ली : : (भारत)

प्रकाशक :
ईस्टर्न बुक लिंकर्स
५८२५, न्यू चन्द्रावल, जवाहर नगर,
दिल्ली-११०००७
दूरभाष : २५२०२८७

SIBN : ८१-८५१३३-५६-५

© सम्पादकद्वयी

प्रथम संस्करण : १९९२

मूल्य : रु० १२००.००

मुद्रक :
अमर प्रिंटिंग प्रेस (शाम प्रिंटिंग एजेन्सी)
८/२५, डबल स्टोरी, विजय नगर, दिल्ली-९

श्रीदक्षिणावर्तनाथप्रणीतमभिज्ञानशाकुन्तलटिप्पणम्

आचार्यबाबूलालशुक्लशास्त्रिणा संस्कृत्येदम्प्रथमतया सम्पादितम्

शारदां शरणं यामशारदाम्भोदसन्निभाम् ।
यस्याः प्रसादादभवत् कालिदासः कवीश्वरः ।। १ ।।

अथ प्रथमोऽङ्कः

प्रारिप्सितस्य ग्रन्थस्याविघ्नसमाप्त्यर्थं शिष्टाचारपरिपालनार्थञ्च मङ्गलाचारं करोति—येति। आद्या सृष्टिः 'अप एव ससर्जादा (म० स्मृ० 1.8) वित्यादिवचनादापः। या वहति विधिहुतम् अग्निः। या होत्री यजमानः। ये द्वे कालं विधत्तः चन्द्रादित्यौ। या श्रुति-विषयगुणा। श्रुतिविषयः शब्दः स गुणो यस्या सा आकाशम्। यामाहुः सर्वबीजप्रकृतिर्भूमिः। यया प्राणिनः प्राणवन्तः वायुः। प्रत्यक्षाभिः तनुभिः प्रपन्नः युक्तः। स ईशो वः पात्विति वाक्यार्थः।

अभिरूपो विद्वान्। 'प्राप्तरूपसुरूपाभिरूपा बुधमनोज्ञयोः' (अ० को० 3.3.131) इत्यमरः। वस्तुनेतिवृत्तेन। वस्तुशब्देन नाट्यकथा कथ्यते। परिहाइस्सदि परिहास्यते। भूतार्थं सत्यम्। प्रच्छायम्—"छाया बाहुल्ये' (अ० 2.4.22) इत्येकवद्भावः। 'स नपुंसक' (अ० 2.4.17) मिति नपुंसकत्वम्। इसि ईषत्। ओदंसअंति अवतंसयन्ति। कृष्णसारं कृष्णं मृगम्। भूयसा प्रकृत्यादि तृतीया। उत्खातिनी निम्नोन्नता। अभीषवः रज्जवः। रथ्या अश्वाः। हरितो हरीन् आदित्याश्वान्। तत्साधु तदेव युक्तम्। महर्षेर्विदितभक्तिं महर्षिणा विदितभक्तिमित्यर्थः।

साधयामः गच्छामः। इङ्गुदी तापसतरुः। तोयाधारपथाः सरः सोपान-मार्गाः। प्रग्रहा रज्जवः। दक्षिणे वृक्षवाटिकाम् "एनपा द्वितीया" (अ० 2.3.31) इति द्वितीया षष्ठ्यर्थे। णोमालिआ नवमालिका। विश्वस्तामनुकूलाम्। आअदपिणद्धेण आयतपिनद्धेन दृढपिनद्धेन। विथ्थारइत्तणं विस्तारयितृ। केसररुक्खओ केसरवृक्षकः। वणजोसिणी वनज्योत्स्ना यद्वा वणजो-सिणी वनप्रियेति। जुषि प्रीतिसेवनयोरिति धातुः। लहेयेति लभेयेति। अत्तगओ आत्मगतः। उज्झिअ उज्झित्वा त्यक्त्वेत्यर्थः। अच्चाहिदं अत्याहितं महाभीतिरिति। आउलिज्जमाणा आकुलीक्रियमाणा। सूनृतया सत्यया। 'प्रियं सत्यञ्च सूनृतम्" (अ० को० 1.6.19)। भवतु प्रतिषेधवाच्यमिदम्। पज्जुवासणं पर्युपासनम्। करणे ल्युट्। यद्दोपास्तिम्। गमणिआ गमनिका।

दक्षिणं दाक्षिण्यम्। उत्तम्म उत्ताम्य। जीइदसव्वस्सेण पि जीवितसर्वस्वेनापि। किं पि किमपि। अत्यर्थमतिशयम्। वसंदा अदार तरुसंघैः वसन्तावतारतरुसङ्घैः। उम्मदइत्तणं उन्मादयितृ। अइ इं अथ किमिति संवादे। अणु ओओ अनुयोगः प्रश्नः।

मदिरेक्षणे मदिरा नाम दृष्टिविशेषः अथवा मदिरेक्षणा दुरवापेति। अस्या अनुरूपवरप्रदाने सङ्कल्पः……। प्रस्थिता गता। प्रतिकूला मे धारयसि। "धारेरुत्तमर्णः" (अ० 1.4.35) इति सम्प्रदानसंज्ञा। अलं सम्भाव्य 'अलं खल्वो" (अ० 3.4.18) रिति क्त्वा।

राज्ञः परिग्रहोऽयमस्मानन्यथा सम्भाव्यालम्। एवं राजाऽहं युष्मभ्यमिदं ददामीत्यर्थः। तवोवणसम्म तपोवनसद्म। सद्म गृहम्। विसज्जिदव्वस्स विसर्जितव्य। रुंदिदव्वस्स रोद्धव्यस्य वा। भावे तव्यत्। विसर्जनस्य रोधनस्येति यावत्।

आरण्णअवुत्तंतेण आरण्यकवृत्तान्तेन। पच्चट्ठेयेण प्रत्यक्षेण। पुरस्कृतः पूजितः। असंस्तुतमपरिचितम्।

॥ इति दक्षिणावर्त्तनाथप्रणीते शाकुन्तलटिप्पणे प्रथमोऽङ्कः ॥

अथ द्वितीयोऽङ्कः

णिव्विण्णो निर्विण्णः। आहिंडीअदि आहिण्ड्यते गम्यते यद्वा जित्क्रीड्यते (?)…। कदुण्हाणि कदुष्णानि। सुल्लमंसं शूल्यमांसम्। अण्हीअदि अश्यते। कंडइदसंधिणो कण्डितसन्धेः। सइदव्वं शयितव्यं शयनमिति यावत्। सुगणलुद्धेहिं श्वगुणलुब्धकैः। वणग्गहणं वनग्रहणम्। एद्द एव एतावत्तैव। जहिंजोह्मः……… । इत्तले (?) ………। इत्तले (?)। ओहीणेसु अवहीनेषु। किदाआरपरिक्कमं कृताचारपरिक्रमम् विहितसन्ध्यावन्दनालङ्कारादिकम्। जवणिआहिं यवनीभिः। मालाधारिणीहिं पडिव्वुदो मालाधारिणीभिः परिवृतः। लहेयं लभेयम्।

कामं प्रियेति। तद्भावदर्शनेनायासि। कामो मदनोऽभिलाषो वा। स्वशब्दताम्—स्वशब्दः आत्मवाची। स्निग्ध वीक्षिता प्रदेशे क्रुद्धास्थाने कामात्मीयवर्गे निक्षिपतीत्यर्थः। वाआ वाक्। जीआवीं अ⋯जयेत्युच्चारयामीत्यर्थः। आउलीअदि आकुलीयते (आकुलीक्रियते) वेदसो वेतसः। आदु उत। आक्किअप्पदेसे आक्रीडप्रदेशे क्रीडास्थाने। जं संच्चं यत् सत्यम्। निपातोऽयं सत्यार्थे। सावदा श्वापदाः। हिंस्राः मृगाः श्वापदाः। विसमिउं विश्रमितुम्। मोदअ-खंडिआए मोदकखण्डिकायाम् अपूपखण्डे। पूर्वं प्रकोष्ठम्। व्यायतत्वात् कृतव्यायामत्वात्। अपचितमप्यलक्ष्यं कार्श्यम् अलक्षकप्रेक्षणीयमित्यर्थः। निदर्शनमुदाहरणम्। णरामिसं नरामिषम्।

निपानसलिकम् आहावजलम्। निपानमाहाव इति निपातः। तद् गूढं तेजः। धंसदु ध्वंसताम्। पिंडखज्जूरेहिं पिण्डखर्जूरैः।

चित्रे निवेश्येति—तस्या वपुर्धातुर्विभुत्वञ्चानुचिन्त्य स्थितस्य मे सा अपरा स्त्रीरत्नसृष्टिः प्रतिभाति। न चैतादृशी अपरा एवंविधा प्रतिभाति। तत्प्रकारमाह—चित्रेत्यादिभिः। रूपोच्चयेन सौन्दर्योच्चयेन। निवेश्य चित्रे लिखित्वा। परिकल्पितसत्वयोगा नु परिकल्पितप्राणसम्बद्धा नु। नैतदपि सम्भवति। विधिना मनसा कृता नु वा मे प्रतिभातीत्यर्थः।

चिक्कणं पाकविशेषः । णिपदिस्सदि निपतिष्यति । आरण्णअस्सारण्यकस्यारण्यसञ्चारिणः । परवती अस्वतन्त्रता । तत्तभवं अंतरेण तत्रभवन्तमन्तरेण उद्दिश्येति यावत् । दिट्ठिराओ दृष्टिरागः ।

अभिमुख इति । मय्यभिमुखे सतीक्षितमीक्षणं संहृतम् । अथवा परवती नु । अन्यनिमित्तकृतोदयं हसितम् । अतः कारणात् मदनो नापि विवृतः किन्तु विनय एव वृद्धिर्भवति । (?) अन्यनिमित्तकृतोदयाद्धासाद् व्याजसन्दर्शितो मदनः संवृतः इति लक्ष्यते । शालीनतयाऽधृष्टतया । 'धृष्टो धृष्णुर्वियातश्च शालीनस्तद्विपर्यये'' (अ० को० 3.1.25) इति ।

पाहेओ पाथेयः । अणुपवणं अनूपवनमुपवनसदृशमित्यर्थः । अवदेसो अपदेशः । व्याज इति यावत् । णीआरछंभाअं नीवारषड्भागम् । उवहरंतु त्ति उपहरन्त्विति । भागधेयं बलिः । दौवारिकः द्वारपालः । दीप्तिमतः प्रतापवतः । चारणद्वन्द्वं चारणमिथुनम् । अइ इं अथ किं संवादे स्वीक्रियालापे वा । नगरपरिघप्रांशबाहुः परिघ आयुधविशेषः । ''परिघोऽर्गलदण्डयोः'' (घातयो अ० को० 3.3.27) इत्यमरः । आशंसन्ते विश्वसन्तीत्यर्थः । यद्वा प्रशंसन्ति । पेंलणा प्रेंक्षणा नियोगः । अभयसत्रेषु रक्षणयागेषु । आणत्तिहारओ आज्ञप्तिहारकः । अज्जू मातृनामैतत् । पारणोउवासो भविदव्वं पारणोपवासो भविता । स्रोतोवहाः नद्यः । आनुयात्रिकं सैन्यम् । परिहासः । परमार्थेन अवितथेन । समेधितः सह वर्धितः ।

।। इति दक्षिणावर्त्तनाथप्रणीते शाकुन्तलटिप्पणे द्वितीयोऽङ्कः ।।

अथ तृतीयोऽङ्कः

उपक्रम्यताम् उपक्रमश्चिकित्सा । उच्छ्वसितं जीवितम् । वैतानिकं यागसम्बद्धम् । जाने इति । कण्वस्य तपसो वीर्यं जाने । इत्यतो बलात् करणं कर्त्तुं न शक्यते इति प्रतिपाद्यते । बाला परवतीति (मे) विदिता बाला शकुन्तला पराधीनेति । अतः पितुराज्ञामन्तरेणास्मत्समीपं नागमिष्यतीति । एवञ्चेदत्र विषयाभिलाषो न युक्तः इत्यर्थः । अहं शकुन्तलाविषयादिदं निर्वर्त्तयितुं न शक्तोऽस्मीति । अतिसन्धीयते प्रवञ्च्यते । संस्थिते समाप्ते । प्रवातः प्रकृष्टो वातः । पीडितं...। नेत्रनिर्वाणं नयनसुखम् । विस्रम्भकथितानि विश्वासकथितानि । सुहअदि सुखायते । वीजअंति वीजयतः । साबाधं सार्ति सदपि भवदपि । यद्वा तदपीति पाठः । तथापीत्यर्थः । तापः कामसमः तथापि ग्रीष्मस्यापराद्धमेवं न सुभगम् । अपराद्धम् इति भावे निष्ठा । तस्मान्नायं ग्रीष्मापराधः । पय्युस्सुआ पर्युत्सुकाः । पुंछिदव्यासि पृष्टव्यासि । बलीयो बलीयान् । समवत्था समवस्था । अवस्थेति यावत् । लख्खेमि लक्षयामि । पडिआरस्स प्रतिकारस्य । उव्वेख्खसि उपेक्षसे । परिहीअसि —परिहीयसे...।

पत्राणामिति । पत्राणां शोषणेनोपलक्षिता मरुता स्पृष्टा माधवीलतेव । कहइस्सं कथयिष्यामि । आआसइत्तिआ आयासयित्री । सज्झवेअणं सह्यवेदनम् ।

पृष्टेति । इयं शकुन्तला बाला अविचार-क्षमा । समदुःखसुखेनान्तरङ्गेण जनेन पृष्टा कस्मान्मनोरथगतमाधिं न न वक्ष्यति । अवश्यं वक्ष्यत्येव । अनया बहुशो विवृत्य पूर्वं दृष्टेति । तपश्शिशिरः प्रथमो मासः । तत दिवसानामन्त मेघान्धकारेण दुर्दिनत्वादर्द्धश्यामत्वम् ।

करेह कुरुत । सिंचेह सिञ्चत । अहिणंदिउं अभिनन्दितुम् । ओदरइ अवतरति । सहेइ सहताम् । चिन्तेहि चिन्तय । ओहीरणा अवधीरणा अवज्ञा । अत्तगुणाअमाणिणि आत्मगुणावमानिनि । णिव्वावइतइं निर्वापयित्रीम् । जोसिणीं ज्योत्स्नाम् । पडंतेण पटान्तेन । गहिअवत्तुअं गृहीतवस्तुकं गृहीतरसम् । लेह-साहणाणि लेखसाधनानि चित्रसाधनानि । दिवारत्तिम्मि दिवारात्रौ अपि । "कालाध्वनोरत्यन्तसंयोगे" (अ. 2.3.5) इति द्वितीया । तुह त्वयि वुत्तं वृत्तं यद्वा तुह हुत्तं त्वदभिमुखम् (?) । मणोरहाइं मनोरथानि । मनोरथशब्देनात्र दुष्यन्त उच्यते । अणुगह्लेदु अनुगृह्णातु । दुवेविणो द्वयोरपि युवयोः ।

रण्णा राज्ञा । अब्भवपत्तएण अभ्युपपत्याऽनुग्रहेण । प्रणयशब्दोऽत्र याच्ञावाची । णिव्वहे हि निर्वह । पुहुइए पृथिव्याः । करभः धनुष्कोटिः यद्वा "मणिबन्धादाकनिष्ठं करस्य करभो बहिः" (अ० को० 2.6.81) रित्यमरः । पेलवैः मृदुभिः । आमंतेहि आमन्त्रयस्व । वेदीं परितः 'अभितः परितः समया' (वा०) इत्यादिना द्वितीया षष्ठ्यर्थे च । प्रयस्ताः प्रयासवत्यः ।

।। इति दक्षिणावर्तनाथप्रणीते शाकुन्तलटिप्पणे तृतीयोऽङ्कः ।।

अथ चतुर्थोऽङ्कः

एत्तएव्व एतावदेव । एत्तएहिं एतावद्भिः । सविअ शपित्वा । अम्महे अस्माभिः । मरिसिदव्वो मर्षितव्यः । णोमालिअं नवमालिकाम् । एव्वं अ णाम एवञ्च नाम । विसअपरम्मुहस्य जणस्स एव्वं विषयपराङ्मुखस्य जनस्यैवम् नामेति यजमानशिष्योक्तम् । इष्टप्रवासेत्यादि-श्लोकार्थं सूचयति । तेन राज्ञा नैतद्विदितं शृङ्गारिणा । वृत्तं न ज्ञातमित्यर्थः । अणज्जं अनार्यम्, निन्द्यम् । असच्चसन्धे असत्यसन्धे । सन्धौ प्रतिज्ञायाम् । अब्भत्थेदि अभ्यर्थयति । आवण्णसत्तं आपन्नसत्वां प्राप्तगर्भाम् । सुह-सअण-पुंछिआ सुखशयनपृच्छिका । समुग्गए समुद्गके । 'समुद्गकः सम्पुटकः' । (अ. 2.6.139) इत्यमरः । गोरोअणं गोरोचनम् । विप्पकरी-अदि विप्रक्रियते । विप्रकारो हिंसा । परिधेहि आधत्स्व । पडिव्वज्जं प्रतिप्रद्यस्व । सम्राजं चक्रवर्तिनम् ।

"पुरुं यदुं तुर्वसुञ्च देवयानी व्यजायत ।
द्रुह्युञ्चानुञ्च पुरुञ्च शर्मिष्ठा वार्षपर्वणी ।।" इति

कमलिनीहरितैः पत्रश्यामैः । पच्चालिंग प्रत्यालिङ्ग । अलं रुदित्वा । 'अलं खल्वो (अ० 3.4.18) रित्यादिना क्तः ।

पिअंवदामिस्साओ प्रियम्वदामिश्रे । अभिजनवतः बन्धुमतः । आत्तीओ आत्मीयः । मा भाआदि मा भैषीः । दौष्यन्ति तनयं दुष्यन्तापत्यत्वे समुचितं पुत्रम् ।

"कार्मुकज्यादिशब्दानां प्रयोगोऽभ्युपगम्यते ।
महाकविप्रयुक्तत्वादर्थोत्कर्षोऽस्तु वा न वा ।।" इति ।

निवेश्य परिणय्य न्यासो निक्षेपः ।।

।। इति दक्षिणावर्तनाथप्रणीते शाकुन्तलटिप्पणे चतुर्थोऽङ्कः ।।

अथ पञ्चमोऽङ्कः

वर्णो गीतिप्रकारः । यथोक्तम्—

"या देवविषया गीतिर्देववाणी तु सा भवेत् ।
मनुष्यविषया सैव वर्णनाम्ना प्रकाशते ।।" इति ।।

भअं भवान् । विसुमरिदोसिणं विस्मृतोऽस्येनाम् । सकृदित्यादि कदाचित् सम्भुक्तोऽयं जन इति हंसपदिकानिर्देशः । वसुमती दुष्यन्तस्य महादेवी । तामन्तरेण तामुद्दिश्येति यावत् । तदस्या हंसपदिकाया एतदिति......। ग्गहिद इत्यादि गृहीतस्य तया परकीयैः हस्तैः शिखण्डके अप्सरोगृहीतस्य वीतरागस्येवेदानीं नास्ति मे मोक्षः । अथवा मर्त्यलोकेऽवीतरागस्येवेति वा पाठः । अवीतरागो रागो तस्य नास्त्येव मोक्षः । परकीयैर्हस्तैः हंसपदिकापरिजनगृहीतस्येति यावत् । नागरिकवृत्त्या वैदग्ध्येन । विधिना तन्त्रयित्वा । तन्त्रि कुटुम्बधारणे । धृतकुटुम्बं कृत्वा ।

औत्सुक्यमात्रमिति । लब्धपरिपालना राजानस्तेषां वृत्तिः केवलमौत्सुक्यमात्रमेवावसादयति । अशनपानादिषु भोज्येषु वैतृष्ण्यं सम्पादयति प्रतिष्ठान्तु क्लिश्नाति । कृतकृत्यो भूत्वा एकत्रमा···प्रतिष्ठान्तु बाधते । अथवा औत्सुक्यमात्रं प्रति अध्यवसाययति सम्पादयतीति यावत् । लब्धपरिपालनवृत्तिः सा प्रतिष्ठा एवं स्वयमेव क्लिश्नाति । कल्पते रक्षणाय । 'क्लृपि सम्पद्यमाने चतुर्थी वक्तव्या" (वा०) इति चतुर्थी ।

नवीकृताः स्म । अहिणवो अभिनवः । सम्मज्जनसस्सिरिओ सम्मार्जनसश्रीकः । अलिदोऽलिन्दः । संभाअइदुं संभावयितुम् । शश्वत्परिचितविविक्तेन सेवितविजनस्थानेन । जनाकीर्णं नगरम् । विअरेदि विकरोति । मध्यस्थाः अनतिशयसक्तबुद्धयः । अथात्रभवती अथशब्दः प्रश्ने ।

देवेति । देव कुतूहलगर्भोपहितो न मे तर्कः प्रसरति । देवस्य कलत्ररूपेणेयमागता न वेत्यभिप्रायः । वेअसि वेपसे । एक्कमेकस्स एकैकस्य । कथं किन्नाम इति । किमिदमुपन्यस्तम् किमिदमिति पदं कथं प्रयुज्यते । संप्पदं साम्प्रतम् । युक्तं कृतमित्यादि । किं कृतकार्यद्वेषः अयं किं धर्मं प्रति विमुखता धर्मवैमुख्यात् । किमेतत् प्रतिभा वा····· अथवा अवज्ञा कृता । अस्मदवज्ञा तया किं कृतम् । कार्याय द्वेष्टि भवानिति अर्थः । अथवा नायं तव दोषः । अमी विकारा एव ऐश्वर्यमत्तेषु प्रायेण मूर्च्छन्ति हि । लज्ज लज्जस्व । जोषं तूष्णीम् । आपन्नसत्वलक्षणां प्राप्तगर्भलक्षणां क्षेत्रिणां कलत्रिणाम् ।

कृताभिमर्षामिति । त्वया कृताभिमर्शां प्रसह्याक्रान्तां सुतामनुमन्यमानो मुनिर्विमान्यो नामावज्ञेयो नाम । न हि तद्युक्तम् । कुतः—नष्टं स्वमर्थं त्वयाऽज्ञानात् हारितं······। तं कन्यारूपं प्रतिग्राहं कारयता दस्युरिव चौर इव त्वं पात्रीकृतोऽसि । सः मुनिस्त्वया विमान्यो नामेति । प्रत्ययप्रतिवचनं प्रमाणोऽर्थवद्वचनम् । समुदाआरो समुदाचारः । प्पत्तारिअ प्रतार्य वञ्चयित्वा । पच्चाक्खिदं प्रत्याख्यातम् । व्यपदेशं प्रकाशं व्याजं वा । अहिण्णाणरूवेण अभिज्ञानरूपेण । प्रशंसायां रूपप् । प्रशस्ताभिज्ञानेनेत्यर्थः । णूणं इत्यादि —नूनं ते शक्रावताराभ्यन्तरेण शचीतीर्थसलिलं वन्दमानायाः प्रभ्रष्टमङ्गुलीयकम् । स्त्रैणं स्त्रीपाटवम् । उवछंदिदं उपच्छन्दनं सान्त्वनम् ।

सगन्धेषु बन्धुषु । परभृताः कोकिलतरुण्यः । अत्तछंदआरिणी आत्मच्छन्दाचारिणी स्वच्छन्दवृत्तिः । हत्थब्भासं हस्ताभ्याशम् अभ्याशं सामीप्यम् । प्रतिहतं निषिद्धम् । सौहृदं स्नेहम् । अतिसन्धानं वञ्चनम् । विनिपातः आकस्मिकोऽनर्थः । परिच्चअह परित्यजत । आः कोपे । पुरोभागिनि दोषैकदर्शिनि । गुरुलाघवं निवृत्युपायम्……। आहोउत ।……वितलो(?)……। किमुत चाथवा । स्त्रीसंस्थानं स्त्रीसन्निवेशज्योतिःसम्बद्धम् । बलवदत्यर्थम् । प्रत्याययति ज्ञापयति ।

।। इति दक्षिणावर्त्तनाथप्रणीते शाकुन्तलटिप्पणे पञ्चमोऽङ्कः ।।

अथ षष्ठोऽङ्कः

भोः कुम्भीलक कस्मिन् त्वया मणिबन्धनोत्सुकं……राजकीयमङ्गुलीयकम् समासादितम् । कुम्भीलकश्चौरः । प्रसीदन्तु भावमिश्राः अहन्नेदृशकर्मकारी । किं खलु शोभनो ब्राह्मण इति कलयित्वा राज्ञा प्रतिग्रहस्ते दत्तः । अहं शक्रावतारवासी धीवरः । घातकः पाटच्चरः । अम्हेहिं अस्माभिः । यादिं जातिं पृष्टा । सूचक कथयतु सर्वमनुक्रमेण । मैनमन्तरा प्रतिबध्नीतेति यावत् । यथावुत्त आज्ञापयति । 'आवुत्तो भगिनीपतिः' (अ० 1.7.12) । कहेहि कथय । जालोद्गालादिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि । "जालमानायः समहो" (अ० 3.3.200) । विशुद्ध आजीवोपायः । हे भट्टारक, सहजं किल यद्विनिन्दितं न हि तत् कर्म विवर्जनीयम् । पशुमारणकर्मदारुणः [अनुकम्पामृदुरेव श्रोत्रियः] । एवेति भिन्नक्रमः । पशुमारकस्यापि दारुणत्वं स्वभावः । एकस्मिन् दिवसे खण्डशो लोहितमत्स्यो कल्पितो मया । तदा तस्योदराभ्यन्तरे रत्नभासुरमङ्गुलीयकं दृष्ट्वा पश्चादहं तस्य विक्रयाय दर्शयन् युष्माभिर्भावमिश्रैः गृहीतः । मारयत वा मुञ्चत वा । अयमस्यागमः । जानुक, विस्रगन्धो व्याहरति मत्स्यगन्ध एव । इदानीमागम एतस्य विमर्शयितव्यम् । राजकुलमेव गच्छामः । तथा गच्छ रे गाण्डभेदिक । गण्डभेदमर्हतीति गण्डभेदिकः । सूचक इमं गोपुरद्वारे अप्रमत्ताः प्रतिपालयत । यावदिदं (अङ्गुलीयकं) यथागमनं भर्त्तुर्निवेद्य ततः शासनं प्रतिगृह्य निष्क्रमामि । प्रविशत्वावुत्तः स्वामिप्रसादाय । जानुक चिरायते खल्वावुत्तः । नन्ववसरोपसर्पणीया राजानः । प्रस्फुरति मे हस्तः अस्य वध्यसुमनसं पिनद्धम् । नार्हति भवानकारणमारणो भवितुम् । एषोऽस्माकं स्वामी गृहीत्वा राजशासनमितोमुखमागच्छति । शुनो मुखं द्रक्ष्यति अथवा गृध्रबलिर्भविष्यति । जानुक मुच्यतामेष जालोपजीवी । उपपन्नः खल्वङ्गुलीयस्यागमः । एष भर्त्रा अङ्गुलीयकमूल्यसम्मितः प्रदेयकोऽपि दापितः पारितोषिकः । भर्तः अनुगृहीतोऽस्मि । एष नामानुग्रहो यच्छूलादवतार्य हस्तिस्कन्धं प्रापितः । आवुत्त राज्ञः परितोषं कथय । तत् खलु न महार्हं रत्नं भर्तुर्बहुमतमिति तर्कयामि । तस्य दर्शनेन भर्त्तुरभिमतो जनः स्मारितः । मुहूर्त्तं प्रकृतिगम्भीरोऽप्युत्सुकलोचन आसीत् । सेइदं णाम आवुत्तेण । सेवितं नामावुत्तेन । ननु भणाम्यस्य कृते मत्स्यशत्रोरिति । भट्टारक, इतः अर्द्धं युष्माकं माङ्गल्यं सुमनोमूल्यं भवतु । एतावद्युज्यते । धीवर महत्तरः प्रियवयस्यस्त्वमिदानीं मे संवृत्तः । कादम्बरीसाक्षिकमस्माकं प्रथमसौहृदमिष्यते । तस्माच्छौण्डिकापणमेव गच्छामः । कादम्बरी मद्यम् । शुण्डिका तत्सम्पादयित्री ।

अच्छरातित्थसण्णिज्जं अप्सरस्तीर्थसान्निध्यम् । उदुच्छवे वि ऋतूत्सवेऽपि । उत्सवोचिते कालेऽपीत्यर्थः । प्पणिज्झाणेण प्रणिधानेन । तिरस्करणी गोपनविद्या । कपोतं प्रणामाञ्जलि-

विशेषः। "तूणो······सङ्गे तूणीरो विशिखाश्रयः" (?) निषङ्ग इषुधिः। अम्हाणं मित्ताव-सुणा रट्ठिएण अस्माकं मित्रावसुना राष्ट्रियेन। 'राज्ञः श्यालस्तु राष्ट्रियः' (1.7.14) इत्यमरः। अक्कीडप्पडिकम्म समप्पिदं आक्रीडप्रतिकर्म समर्पितं क्रीडास्थानपालनकर्म समर्पितमित्यर्थः। आअंदुअदाए आगन्तुकतया। कौलीनं जनवादः। विलक्षः व्याकुलः। प्रत्यादिष्टो निर्वर्तितः। तेजोगुणात् तेजोमहिम्ना। संस्कारः। अधिकरणे घञ्। तत्रोल्लिखितः उत्तेजितः क्षीणः इति नालक्ष्यते दृष्टिप्रतिघातात्। किलमदि क्लाम्यति। चिइस्सिदव्वो चिकित्सितव्यः।

कथं न्विति। त्वं करं विहाय अम्भसि कथं निमग्नेति। बन्धुरं सुन्दरम्। अचेतनं गुणापेक्षीत्यसम्भवं नाम। अहमपि तस्या ममापि तस्या गुणा नालक्षये। किमिति चेत्— अवधारिता ह्रियेति। ममापि तस्यां गुणा न सन्तीत्यर्थः। अथवा—'अचेतनं नाम गुणान्न लक्षयेत् मयैव कस्मादवधीरिता प्रिया' इति वा पाठः।

भावाणुप्पवेसो भावानुप्रवेशः। भावा अनुप्रवेश्यन्ते अस्मिन्निति भावानुप्रवेशः। णिम्णुण्णअ-प्पदेसेसु निम्नोन्नतप्रदेशेषु स्तननयननाभिमध्यादिस्थानेषु। वत्तिआ वर्तिका शलाका। वर्तिकाशब्देन तद्व्यापारोऽनुमीयते। णिउणदा निपुणता चित्रनिपुणतेति यावत्।

यद्यदिति। अस्याः शकुन्तलायाः सम्बन्धि यद्यदङ्गं तत् साधु अस्मिँश्चित्रेऽन्यथा क्रियते। अशक्यत्वान्न तथा लावण्यं लिखितमित्यर्थः। तथापि तस्या लावण्यं रेखयाऽल्पमात्रेण किञ्चिदन्वितमित्यर्थः। चित्रे अत्यल्पमेवायातीति (भावः)।

अणवलेअस्स अनवलेपस्यान्यस्त्रीविषयस्य। तिस्सो तत्तभोदीओ तिस्रस्तत्रभवत्यः [दृश्यन्ते]। स्विन्नेति। स्विन्नाङ्गुलिविनिवेशो दृश्यते। दृश्यत इत्यनेन स्वकीयसात्त्विक-विकारेषु स्वेदोद्गमः प्रकटीकृतः। रेखाप्रान्तमालिन्येनाश्रुपूर्णलोचनत्वात् चित्रकरणे करव्यासङ्गः प्रदर्शितः। चित्रकरणव्यासङ्गाभावात् पुनः कपोलाभ्यां पतित अश्रु चालक्ष्यं गण्डपतितत्वमेवोह्य-मित्यर्थः। लंबकुच्चाणं लम्बकूर्चानाम्। कुसुमासअ पाडच्चरो कुसुमासवपाटच्चरः मधुप इत्यर्थः। अहिजादं अभिजातम्। पौरोभाग्यं दोषैकदर्शनम्। अखिलं शून्यम्। वत्तिआकरण्डअं वर्तिकाकर-ण्डकं चित्रोपकरणभाजनम्। साएदअस्स साकेतकस्य। साकेतमयोध्या। साकेते वसतीति साकेतकः। स गर्भः पित्र्यं रिक्थं धनम्। प्पविट्ठं प्रवृष्टम्। भावे निष्ठा। प्रवर्षणमित्यर्थः। पिण्ड-भाजः पितरः। अस्तीत्यव्ययम्। जण्ण भाओस्सुआ यज्ञभागोत्सुकाः। कहं ण भाइस्सं भेष्यामि। हत्थावावसहिदं हस्तावापसहितम्। तत्तद्ध्वन्यत एव लक्ष्यमिति।

॥ इति दक्षिणावर्त्तनाथप्रणीते शाकुन्तलटिप्पणे षष्ठोऽङ्कः ॥

अथ सप्तमोऽङ्कः

सिद्ध्यन्तीति। नियोज्याः भृत्याः। कर्मसु महत्सु अपि सिद्ध्यन्ति। वर्णैः पञ्चाङ्ग-द्रव्यैः। परिवहो वायुविशेषः। हरिभिः हेमप्रभैरश्वैः सन्तानं व्रजन्ति अविच्छिन्नप्रवाहं वहन्ति। समयमन्तिकः सङ्केतबद्धः। आशंसे प्रार्थये।

सिंघ जिंभ सिंह जृम्भस्व। किलणिज्जं क्रीडनीयकम्। ममकेरके उडजे मक्कंडअस्स ममोटजे मार्कण्डेयस्य। उशन्ति—वश् कान्तौ। 'गृहिज्येत्यादिना (अ० 6.1.16) सम्प्रसारणम्।

कामयन्त इत्यर्थः। सउंदलावण्णं शकुन्त-लावण्यं शकुन्तलावर्णमिति च स्फुरति। रक्खाकरंडअं रक्षागुलिका अपराजिता।

अथ प्रश्ने। आसास आश्वासः। आसंस आश्वस। अपकारः उपप्लवः। व्यलीकमपराधः अप्रियं वा। ह्रिरिआमि जिह्रेमि। एकान्तरम् एकः दक्षः मरीचिश्च अन्तरे मध्ये यस्य। अभिप्रेतसिद्धिः पुत्रदारसमागमः। निमित्तभूतः प्रसादः पश्चात् नैमित्तिक्यः सम्पदः पूर्वमिति भावः। अवतरणात् अवतरणं सोपानमार्गः। अप्पडिहृदरआ अप्रतिहृतरथाः। उवविसथ उपविशत। मन्युः कोपः। प्राज्यं भूरि।

श्रुतमहतां सरस्वती विदुषां वाणीत्यर्थः। महीयतां वर्द्धताम्। 'कण्वादिभ्यो यक्' (अ० 3.1.27)। महीति प्रातिपदिकम्। सभाजयतु। पूजायां वृद्धावपि महीयते। महीयसां महाकवीनामिति (च)। परिगतशक्तिः परिगता मिलिता देहार्धतादात्म्यं गता शक्तिः शिवा यस्येति यावत्। महाकविना आरम्भे समाप्तावपि मङ्गलं कृतमिति शिवम्।

दक्षिणावर्तनाथेन रचितं सूर्यसूनुना।
सामासं टिप्पणं शाकुन्तलस्य सुमनःप्रियम्॥

॥ इति दक्षिणावर्त्तनाथप्रणीते शाकुन्तलटिप्पणे सप्तमोऽङ्कः॥

शाकुन्तलटिप्पणं समाप्तम्

उज्जयिनी

श्रीदक्षिणावर्तनाथ
एवम्
अभिज्ञानशाकुन्तलटिप्पणम्

[समीक्षात्मक प्रस्तुति]

बाबूलाल शुक्ल शास्त्री

कालिदास की नाट्यरचनाओं के व्याख्याकारों के क्रम में आनेवाले "दक्षिणावर्तनाथ" ऐतिहासिक क्रम में प्रथम स्थान पर अवस्थित हैं। इनकी कालिदास-काव्यों (रघुवंश, कुमार-सम्भव तथा मेघदूत] पर भी प्रदीप व्याख्याएँ हैं, जिनमें मेघदूत पर व्याख्या का प्रकाशन हो गया है, जिसका सम्पादन म० म० टी० गणपतिशास्त्री ने किया था। दक्षिणावर्तनाथ को अपने पूर्वभावी मार्गनिर्माता के रूप में मल्लिनाथ कवि ने भी स्मरण किया है—

तथापि दक्षिणावर्तनाथाद्यैः क्षुण्णवर्त्मसु।
वयं च कालिदासोक्तिष्ववकाशं लभेमहि ॥

अपने नाम एवं स्थिति के आधार पर दक्षिणावर्तनाथ दक्षिण भारत के निश्चितरूप से निवासी थे यह स्पष्ट है। मेघदूत की दक्षिणावर्तनाथ की टीका के संस्करण की प्रस्तावना में म० म० टी० गणपतिशास्त्री ने इन्हें चोल प्रदेश का निवासी बतलाया जो प्रमाणानुमोदित तथ्य है। दक्षिणावर्त के नाम से चोल प्रदेश में एक गाँव स्थित है जहाँ के देवता का नाम भी दक्षिणावर्त है तथा ये टीकाकार दक्षिणावर्तनाथ के नाम वाले ही हैं। अपनी टीका के आरम्भ में दक्षिणावर्तनाथ प्रायः अपना परिचय इस प्रकार देते हैं—

मया महार्जुनग्रामजन्मना सूर्यसूनुना।
दक्षिणावर्तनाथेन रघुवंशो समर्पताम् ॥

इसी प्रकार शाकुन्तलटिप्पण में भी कहा गया है कि वह महार्जुनग्राम के निवासी हैं, तथा पण्डित सूर्य के पुत्र हैं। इस प्रकार इस विवरण से यही ज्ञात होता है कि ये महार्जुन नामक ग्राम के निवासी थे। दक्षिणावर्तनाथ ने अपने नाम को भी दक्षिणावर्तनाथ तथा दक्षिणावर्तपति

जैसे शब्दों से दिखलाया जो कि प्रायः पर्यायपद (से युक्त) हैं। जैसे कुमारसम्भव की व्याख्या के आरम्भ में वे लिखते हैं—

स दक्षिणावर्तपतिर्ददाति दीपं कुमारस्य च सम्भवस्य।

इससे यही बात स्पष्ट होती है कि इनका दक्षिणावर्त नाम था जिसके आगे नाथ या पति शब्द लगा कर रखा गया था। उत्तरभावी व्याख्यादि लेखकों ने कहीं केवल "नाथ" या दक्षिणावर्त के नाम से इन्हें दिखलाया भी है तथा मल्लिनाथ ने दक्षिणावर्तनाथ तथा नाथ पद से इन्हीं को यथास्थान सङ्केतिक किया है।

दक्षिणावर्तनाथ ने अपने निवास-ग्राम "महार्जुन" का बार-बार उल्लेख कर अपना परिचय दिया था। इसकी वर्तमान स्थिति का सही बिन्दु आज धूमिल है। इस विषय में विचार करने पर कुम्भकोणम् के समीपवर्ती एक ग्राम जिसका नाम मध्यार्जुन है, वही कदाचित् "महार्जुन" रहा हो यही प्रतीत होता है। यह स्थान समस्त दक्षिण भारत में प्रसिद्ध तीर्थ के रूप में है जिसके मुख्य देवता शिव हैं। इस क्षेत्र की कुम्भकोणम्-परिसर में स्थिति भी विद्वानों एवं कविजन ने अपनी रचनाओं में दिखलाई है। अतएव जिस महार्जुन का उल्लेख ग्रन्थकार दक्षिणावर्त ने किया वह "मध्यार्जुन" क्षेत्र ही होगा यह स्पष्ट है।

स्थितिकाल

दक्षिणावर्त की रघुवंश, कुमारसम्भव तथा मेघदूत पर की गई व्याख्याओं के अनुशीलन के आधार पर इनके स्थिति-काल का आकलन किया जा सकता है। दक्षिणावर्तनाथ ने केशवस्वामी विरचित "नानार्थार्णवकोश" से अनेक उद्धरण अपनी व्याख्याओं में लिए हैं। इसे केशवकोश भी कहते हैं। इस कोश की रचना बारहवीं शती में हुई थी, अतः केशवस्वामी का समय दक्षिणावर्तनाथ के स्थितिकाल की पूर्वसीमा है। इसे कोश के दक्षिणावर्तनाथ के उद्धरणों को देखकर ही बाद में म० म० कोलाचल मल्लिनाथ एवम् इनके अनुगत श्री अरुणाचलनाथ ने भी इसी कोश से अपेक्षानुरूप उद्धरण लिए हैं, परन्तु इन सबसे पूर्व उद्धरणों का आदान दक्षिणावर्त का ही रहा यह निर्विवाद है। समीक्षकगण मल्लिनाथ तथा अरुणाचलनाथ का स्थितिकाल दक्षिणावर्तनाथ से परवर्ती स्वीकार करते हैं।

दक्षिणावर्तनाथ की अन्तिम सीमा मल्लिनाथ के समय से निश्चित करना युक्तियुक्त होगा जिनका स्थितिकाल पन्द्रहवीं शती ईस्वी का पूर्वभाग था। दक्षिणावर्तनाथ ने अपनी रघुवंश व्याख्या[1] में प्रसङ्गवश नारायणीय ग्रन्थ से भी एक उद्धरण लिया है। नारायणीय ग्रन्थ का अन्य नाम "तन्त्रसार-संग्रह" भी है, और यह ग्रन्थ चौदहवीं शती के उत्तरार्द्ध में रचित एक ज्योतिष-शास्त्र का ग्रन्थ है जिसका लेखक केरल देश का था। इस ग्रन्थ के रचयिता के सम-सामयिक या इससे कुछ ही समय पश्चात् दक्षिणावर्त ने रघुवंश तथा अन्य व्याख्याओं का लेखन किया होगा। अतएव इन उपर्युक्त तथ्यों को देखकर दक्षिणावर्तनाथ का स्थितिकाल पन्द्रहवीं शती का आरम्भ या चौदहवीं शती का अन्तिम दशक निश्चित होता है।

रचनायें

दक्षिणावर्तनाथ ने अपनी मेघसन्देश पर लिखी प्रदीप व्याख्या में यह बतलाया है कि यह व्याख्या रघुवंश तथा कुमारसम्भव पर लिखी प्रदीप व्याख्याओं के पश्चात् लिखी गई हैं।[2] इससे कालिदास-प्रणीत रघुवंश, कुमारसम्भव तथा मेघसन्देश पर दक्षिणावर्तनाथ द्वारा टीकाओं के प्रणयन की सूचना मिलती है। इसके अतिरिक्त इनकी कालिदास के ही प्रसिद्ध नाटक अभिज्ञानशाकुन्तल पर एक लघुव्याख्या शाकुन्तलटिप्पण भी प्राप्त है, जिसकी एक प्रति विद्यमान है। इस प्रकार देखने पर यही स्पष्ट होता है कि दक्षिणावर्तनाथ ने कालिदास के तीन काव्यों तथा एक नाटक पर व्याख्या की थी तथा इनकी रचनायें भी क्रमिक रूप में रघुवंश, कुमारसम्भव तथा मेघदूत पर की गई थीं। शाकुन्तलटिप्पण का उल्लेख स्वतन्त्ररूप में रहने से कदाचित् यह उनकी प्रथम कृति भी मानी जा सकती है। यहाँ हम क्रमशः इनकी रचनाओं के विषय में विवरण दे रहे हैं—

रघुवंश-प्रदीप

दक्षिणावर्तनाथ ने रघुवंश की प्रदीप व्याख्या के आरम्भ में सर्वप्रथम देवी सरस्वती की वन्दना के पश्चात् एक तथ्य यह भी (परम्परानुगामी होने से) दिखलाया कि महाकवि कालिदास ने माता सरस्वती के प्रसादस्वरूप ही कवित्वशक्ति तथा उससे अग्रस्थिति की प्राप्ति की। उन्होंने अपने व्याख्यालेखन की प्रवृत्ति और उद्देश्य को स्पष्ट करते हुए कहा कि पूर्ववर्ती व्याख्यानों ने कालिदासीय काव्यार्थों की स्थिति दुर्बोध कर दी थी, अतः उसके उद्धार हेतु यह व्याख्यालेखन आवश्यक था। रघुवंश पर पूर्वभावी व्याख्यानों से फैलाए गए प्रमादों एवम् अर्थों को ठीक करना और ग्रन्थ के उपयुक्त पाठों को उपस्थापित कर उनके तात्पर्य को दिखलाना भी इस व्याख्या का उद्देश्य था। इस व्याख्या में विभिन्न प्रदेशों से एकत्रित प्रतियों के आधार पर पाठों को एकत्रित कर, उनकी समीक्षा के पश्चात् उपयुक्त पाठों को समाविष्ट किया गया है, तथा अनभीष्ट पाठों को छोड़ दिया है। उन्होंने अपने महार्जुन ग्राम के निवास तथा अपने पिता पण्डित अर्जुन का उल्लेख कर अपना परिचय भी दिया है।[3]

यद्यपि दक्षिणावर्तनाथ ने रघुवंश की प्रदीप-व्याख्या में पूर्वभावी व्याख्यानों का नामोल्लेख नहीं किया किन्तु यत्र-तत्र अर्थ-विवरण के प्रसङ्ग में चर्चा विद्यमान है। यह व्याख्या न तो विस्तृत है और न ही संक्षिप्त है। इसमें अपेक्षित सभी तथ्य एवं बातें दिखलाई गई हैं, और आवश्यकतानुसार प्रामाणिकता को दिखलाने के लिए शास्त्र-ग्रन्थकारों को अपने समर्थन-हेतु उद्धत किया है। अपने समसामयिक एवं प्रदेश के भौगोलिक तथ्यों एवं पौराणिक प्रसङ्गों की व्याख्या इसमें अपनी एक अलग विशेषता को दर्शाती है। पूर्वभावी ग्रन्थ एवं ग्रन्थकारों की अस्सी से अधिक रचनाओं से उद्धरण मिलते हैं।

रघुवंश के लब्धप्रतिष्ठ व्याख्याकार मल्लिनाथ ने दक्षिणावर्तनाथ की इस व्याख्या की अनेक स्थानों पर समीक्षा की परन्तु उन्होंने इस व्याख्या को अपना मार्गनिर्देशक भी बतलाया। इसी के पाठों को आदर्श मानकर अरुणगिरिनाथ ने रघुवंश पर एक विस्तीर्ण व्याख्या लिखी जिसमें स्थान-स्थान पर दक्षिणावर्त का मत रखा गया। इस प्रकार यह स्पष्ट है

कि दक्षिणावर्तनाथ की यह प्रदीप व्याख्या कितनी महत्त्वपूर्ण, मूल्यवान् एवम् उपयोगी थी, यह निर्विवाद कहा जा सकता है।

कुमारसम्भव-प्रदीप या कुमारसम्भव-दीपिका

दक्षिणावर्तनाथ ने कालिदास के प्रसिद्ध महाकाव्य कुमारसम्भव की प्रदीप या दीपिका नामक व्याख्या की तथा उसके आरम्भ में बतलाया कि कालिदास ने अपने इस काव्य में कुमार या स्कन्द की उत्पत्ति का वर्णन नहीं किया[4] (या वे जन्म के प्रसङ्ग तक नहीं पहुँच पाए थे)। इसी कारण उनकी रचना आज परम्परा से आठ सर्ग तक ही प्राप्त मानी जाती है। यहीं दक्षिणावर्तनाथ ने इस व्याख्या के पूर्व रघुवंश पर विनिर्मित अपनी व्याख्या (प्रदीप) का भी उल्लेख किया तथा इस क्रम में यह भी बतलाया कि जिन बातों को रघुवंश की टीका में उठाया गया था उन्हें प्रसङ्ग आने पर कुमारसम्भव में विचार कर सप्रमाण पुनः स्पष्ट किया जाएगा।[5]

रघुवंश की व्याख्या की तरह कुमारसम्भव की दीपिका में दक्षिणावर्त ने ग्रन्थों तथा ग्रन्थकारों को उद्धृत कर उनका उल्लेख किया जो लगभग चालीस हैं। यह व्याख्या भी रघुवंश-दीपिका की सरणि में प्रामाणिक एवं संतोषप्रद अर्थों को दिखला कर अपना ऐतिहासिक महत्त्व रखती है तथा कालिदासीय काव्य के आशय को स्पष्ट करने में मूल्यवान् योगदान करती है। इस टीका का अरुणगिरिनाथ तथा नारायण ने गम्भीर परिशीलन कर स्थान-स्थान पर उसे उद्धृत किया है तथा दक्षिणावर्तनाथ-सम्मत पाठक्रम का ही इन दोनों उत्तरभावी व्याख्याओं में अनुसरण हुआ है। यह टीका सम्पादित हो चुकी है तथा शीघ्र ही कालिदास अकादेमी, उज्जैन से प्रकाशित होने की प्रतीक्षा में है।

मेघसन्देश-प्रदीप

कालिदास-प्रणीत मेघसन्देश पर दक्षिणवर्तनाथ ने "प्रदीप" व्याख्या लिखी थी जो कालिदास के काव्यार्थ पर विशेष प्रकाश डालती है। यह रघुवंश और कुमारसम्भव के पश्चात् लिखी गयी है तथा काव्यों के टीकाक्रम में तीसरे स्थान पर विद्यमान है। इस प्रदीप व्याख्या को एक विशिष्ट प्रस्तावना के साथ म० म० टी० गणपतिशास्त्री ने सम्पादित कर त्रिवेन्द्रम् संस्कृत ग्रन्थमाला में वर्ष 1919 में प्रकाशित करवाया था। इस संस्करण के दुर्लभ हो जाने से तथा लोकप्रिय हो जाने के कारण इसका पुनः सम्पादित एवं विशिष्ट प्रस्तावना के साथ डॉ० एन० पी० उन्नी ने एक संस्करण प्रकाशित करवाया जो सम्प्रति प्राप्य है। इस टीका का अपने व्याख्यान तथा कालिदासीय अर्थों के स्फोरण में अलग वैशिष्ट्य है जिसकी विस्तार से चर्चा यहाँ अप्रासङ्गिक है।

अभिज्ञानशाकुन्तल-टिप्पण

कालिदास-प्रणीत काव्य-रचनाओं की तुलना में उनकी नाट्यकृतियों पर रचित व्याख्यानों की संख्या कम ही है। यदि कुछ टीकाएँ मिलती भी हैं तो वे इनके अतिप्रसिद्ध तथा लोकप्रिय नाटक अभिज्ञानशाकुन्तल पर हैं, अन्य रूपकों पर इतनी व्याख्याएँ नहीं हुई हैं। उपलब्ध व्याख्यानों को देखने पर यह स्पष्ट हो जाता है कि कालिदास के शाकुन्तल-नाटक पर

यह टिप्पण-रूप संक्षिप्त व्याख्यान सर्वप्राचीन होने से अपना ऐतिहासिक महत्त्व भी रखता है, तथा परवर्ती व्याख्यानों को प्रेरित करने वाला होकर पृष्ठभूमि-आधार भी है। दक्षिणावर्तनाथ ने इस टिप्पण के आरम्भ में कालिदास कवि के सरस्वती के प्रसाद से कवित्व-प्राप्ति की कथा को पुनः उपस्थापित किया—

शारदां शरणं यामश्शारदाम्भोदसन्निभाम्।
यस्याः प्रसादादभवत् कालिदासः कवीश्वरः॥

टिप्पण-समाप्ति-पुष्पिका में वे लिखते हैं—

दक्षिणावर्तनाथेन रचितं सूर्यसूनुना।
समाप्तं टिप्पणं शाकुन्तलस्य सुमनःप्रियम्॥

यद्यपि यह टिप्पण दक्षिणावर्तनाथ ने अतिसंक्षिप्त रूप में निर्मित किया परन्तु इसके व्याख्यान पर आगे चर्चा और समीक्षा परवर्ती व्याख्याकारों ने की थी। दक्षिण के एक महत्व-पूर्ण व्याख्यान "शाकुन्तलचर्चा" में दक्षिणावर्तनाथ के इसी टिप्पण को उद्धृत कर समीक्षा की गयी है। इससे यह स्पष्ट है कि "चर्चा" के रचयिता के समक्ष उस समय दक्षिणावर्तनाथ का टिप्पण सामने था और प्राचीन भी। "चर्चा" का प्रकाशन त्रिवेन्द्रम्-संस्कृत-ग्रन्थमाला, संख्या 165, वर्ष 1970 में हो चुका है तथा इसका रचयिता अज्ञात है, क्योंकि ग्रन्थ अपूर्ण है किन्तु अतिशय महत्वपूर्ण भी। यहाँ क्रमशः हम "चर्चा के वे अंश दिखला रहे हैं जहाँ टिप्पणकार को उद्धृत किया गया है—

1. शाकुन्तल के प्रथम अङ्क में "अमुना सारङ्गेण दूरम्" इत्यादि पर चर्चाकार ने दिखलाया कि "टिप्पणकारस्तु" कृत्यादिभ्य उपसंख्यानम्", "इति तृतीयेत्याहुः"।

2. इसी अङ्क में "तत्साधु कृतसन्धानम्" इत्यादि पद्य पर चर्चाकार ने बताया कि—"टिप्पणकारस्तु तत्साधु तदेव युक्तमिति वाक्यभेदेन व्याचष्टे"।

3. द्वितीयाङ्क में उटज-प्रसङ्ग में टिप्पणकार-धृत पाठ को उद्धृत करते हुए—"तादृशेषु दुष्प्रवेशेषु आकुलप्रदेशेषु विपिनस्थलेषु। आइडप्पदेसेषु इति टिप्पणकारपाठः। आक्रीडप्रदेशेषु क्रीडास्थानेष्विति चार्थः॥

4. इसी अङ्क में—"अनाघ्रातं पुष्पम्।" इत्यादि पद्य की व्याख्या में चर्चाकार ने दिखलाया कि—"टिप्पणकारस्तु कं भोक्तारं समुपस्थास्यति। कं पुरुषं भोक्तारं परिकल्प्य समुपस्थापयिष्यतीति अन्तर्भावितण्यर्थः। कं भोक्तारं समुपस्थास्यतीति चोदनं पचतीतिवद् व्यवहारः।"

5. इसी तरह द्वितीय अङ्क के—"आशंसन्ते सुरयुवतयः पौरहूते च वज्रे", इत्यादि (2.16) पद्य के व्याख्यान में "आशंसन्ते इच्छन्ति। प्रार्थयन्ते" इति टिप्पणकारः।

उपर्युक्त इन उद्धरणों से स्पष्ट हो जाता है कि दक्षिणावर्तनाथकृत टिप्पण ही यहाँ शाकुन्तलचर्चाकार ने उद्धृत किया जो कि उनसे पूर्वभावी तो था ही, साथ ही प्रतिष्ठित और

प्रसिद्ध भी था तथा इसी कारण उसे आधारभूत एवं समीक्ष्यकोटि में स्थान मिला था। यद्यपि यह टिप्पण आकार में छोटा है, फिर भी शाकुन्तल के जिन पाठों को यह दिखलाता है उनका दक्षिण के केरल प्रदेश में प्रचलन था तथा वे एक प्रकार से स्थापित पाठ हो गये थे। अतएव वर्तमान में प्राप्त सूचनाओं के आधार पर यही कहा जा सकता है कि कालिदास के शाकुन्तल नाटक पर दक्षिणावर्तनाथ का यह टिप्पणरूप व्याख्यान महत्वपूर्ण, संरक्षणीय एवम् अनुशीलन के योग्य है। यद्यपि दक्षिणावर्तनाथ ने अपनी टीकाओं में विक्रमोर्वशीय की भी चर्चा की थी, परन्तु उक्त रूपक पर इनकी टीका प्राप्त होने की कोई सूचना नहीं है। दक्षिणावर्तनाथ कालिदासीय कृतियों के एक ऐसे मर्मज्ञ मनीषी थे जो उनके गुणादि से अभिभूत थे और उन्हें सारस्वत कवि के रूप में आदर देते थे। इसके अतिरिक्त इन पूर्व विवरणों से यह भी स्पष्ट होता है कि दक्षिणावर्तनाथ ने केवल कालिदास की कृतियों पर ही अपनी व्याख्याएँ लिखी थीं।

दक्षिणावर्तनाथ की ये टीकाएँ अपनी संक्षिप्तता, सुबोधता एवं सारगर्भिता के कारण भारत में न केवल लोकप्रिय रहीं किन्तु शताब्दियों तक निरन्तर प्रसिद्ध रह कर अनुशीलित भी होती रहीं। उनकी विषय-व्याख्यान की विशिष्ट शैली ने उन्हें व्याख्याकारों में आदर्श एवं महत्वपूर्ण स्थान प्रदान किया। यही कारण है कि उनके उत्तरभावी कालिदास-काव्यों के व्याख्याकारों कोलाचल मल्लिनाथ, अरुणाचलनाथ एवम् उनके अनुगत व्याख्याकार नारायण पण्डित, चारित्रवर्द्धन आदि ने इनके मत को दिखला कर व्याख्यात स्थलों की समीक्षा भी की है। इन बातों से दक्षिणावर्तनाथ का महत्व और भी अधिक हो गया है और वे कालिदास-काव्यों के एक प्रतिष्ठित व्याख्याकार के साथ-साथ वल्लभदेव के बाद दूसरे प्राचीन टीकाकार हैं, यह निर्विवाद रूप में कहा जा सकता है।

प्रकृत संस्करण

दक्षिणावर्तनाथ-प्रणीत शाकुन्तलटिप्पण के अद्यावधि अप्रकाशित होने के कारण उसे सम्पादित कर टीकाकार के विषय में अपेक्षित परिचयादि विवरण देते हुए यह संस्करण सर्वप्रथम प्रकाशित हो रहा है, जिससे प्रसन्नता एवं सन्तोष हो रहा है क्योंकि इसका प्रकाशन आवश्यक होने के साथ महत्वशाली भी है। इसका सम्पादन एक मात्र हस्तलिखित मातृका के आधार पर किया गया है। यह हस्तलिखित प्रति मद्रास राज्य हस्तलिखित ग्रन्थागार में थी। सूची के अनुसार इसकी ग्रन्थ संख्या 2775 है। इसी ग्रन्थ की देवनागराक्षर लिखित एक प्रतिलिपि भी वहाँ विद्यमान है तथा इसका लेखन विद्वज्जन के अनुशीलन के लिये वर्ष 1918 ई० में वहीं करवाया गया था। इसी देवनागराक्षर प्रतिलिपि की एक फोटो प्रति केरल के डा. प्रो. एन. पी. उन्नी, अध्यक्ष, संस्कृत विभाग, केरल विश्वविद्यालय ने मद्रास से प्राप्त की थी, जिसे उन्होंने अपना कार्य करने के बाद कालिदास अकादेमी के अनुसन्धान-ग्रन्थागार को प्रदान किया था। इसी प्रति को आधार बना कर इसका सम्पादन हुआ है। इसकी अन्य प्रति यदि भविष्य में कहीं से प्राप्त होगी तो उसका भी आगे संशोधित संस्करण में उपयोग होने की आशा के साथ इसी एकमात्र प्रति से ही संतोष है, तथा सहृदय एवं संशोधकजन इस कार्य को भी उदारता से प्रोत्साहित करेंगे ऐसा विश्वास है।

आभार एवं सहकार

इस संस्करण के सम्पादन में आधारभूत सहकार के कारण सर्वप्रथम डा. एन. पी. उन्नी, प्राध्यापक एवम् अध्यक्ष, संस्कृत विभाग, केरल विश्वविद्यालय का हृदय से आभारी हूँ, जिन्होंने अपने संग्रह से शाकुन्तलटिप्पण की फोटोकॉपी प्रदान की। साथ ही अप्रत्यक्षरूप में पारम्परिकरूप से सहायता के कारण मद्रास शासन के हस्तलिखित ग्रन्थागार के अधिकारी का भी आभार मानता हूँ।

कालिदास अकादेमी, उज्जैन के सञ्चालक आचार्य श्रीनिवास रथ का इस प्रसङ्ग में आभार मानता हूँ, जिनकी अकादेमी के प्रौढ़ अनुसन्धान-कार्य में सदैव रुचि रहती है। अनुसन्धान सहायक डॉ. जगदीश शर्मा का तथा कालिदास अकादेमी परिसर के सहयोग का भी हृदय से आभार मानता हूँ।

सन्दर्भ-सङ्केत

1. द्र.—रघुवंश-व्याख्या में स वृत्तचूलश्चलकाकपक्षकैः (रघु. 3.28)
   पर निम्नलिखित उद्धरण—
   वेलागरु खारश्शोणश्शर्मणेवेत्तिभेदिताः।
   लिप्यर्णा राशिषु ज्ञेया षष्ठेशादींश्च योजयेत्॥ (त्रिवेन्द्रम् संस्कृत सीरीज नं० 204 पृ० 8)
2. द्र.—"रघुवंशकुमारसम्भवौ द्वौ स्फुटभावौ किल यस्य दीपिकायाम्।"
   मेघसन्देश—व्याख्या में आरम्भ का पद्य।
3. द्र. प्रदीपव्याख्या – (आरम्भिक पद्य संख्या 1 से 5 तक जो इस प्रकार है)।
   शारदां शरणं यामः शारदाम्भोदसन्निभाम्।
   यस्याः प्रसादादभवत् कालिदासः कवीश्वरः॥ 1॥
   दुर्व्याख्यातृवचोदग्धां नष्टप्रायप्रभाविताम्।
   भारतीं कालिदासस्य समुत्कर्तुं त्वरामहे॥ 2॥
   मया महार्जुनग्रामजन्मना सूर्यसूनुना।
   दक्षिणावर्तनाथेन रघुवंशो समर्पताम्॥ 3॥
   खालखाद्योतदुर्धर्षां प्रदीपप्रभयाऽनया।
   निष्प्रत्यूहं निषिञ्चन्तो नयन्तु परमां दशाम्॥ 4॥
   वैदेशिकेषु पाठभेदान् निरीक्षितान्।
   साधूनिवार्पयन्नन्यांस्त्यजन् व्याख्यातुमारभे॥ 5॥
   इस रघुवंश-व्याख्या की हस्तलिखित प्रति केरल विश्वविद्यालय के हस्त-लिखित-ग्रन्थागार में विद्यमान है।

4. कुमारसम्भव-दीपिका पद्य । तथा 2 –

नमः कुमाराय पुरातनाय बालाय विद्यागुरवे गुरूणाम् ।
कविस्तु नालं किल कालिदासो यत्सम्भवं वक्तुमभूदशेषम् ।।
प्रवर्तिता येन रघोस्तु वंशे सा दीपिका दर्शितसर्वभावा ।
स दक्षिणावर्तपतिर्ददाति दीपं कुमारस्य च सम्भवस्य ।।

5. द्र.-रघुवंश-दीपिका में "आसीद्वरः कण्टकितः प्रकोष्ठः" (रघुवंश—7.22) तथा कुमारसम्भव-दीपिका में "रोमोद्गमः प्रादुरभूदुमायाः (कुमारसम्भव—7.77) पद्यों की व्याख्या । यहाँ उन्होंने सात्त्विक भावों पर विचार किया तथा लक्षणादि को भी मीमांसित किया ।

6. मेघसंदेश-टीका—पद्य 1—

रघुवंशकुमारसम्भवौ द्वौ
स्फुटभावौ किल यस्य दीपिकाभ्याम् ।
स ददाति रसोज्ज्वलं प्रदीपं
तिमिरं मेघसमुद्भवं विहन्तुम् ।।

उज्जयिनी